श्रीपेजावरपूज्यपादयुगले पद्यप्रणामाञ्जलिः

॥ १ ॥

श्रीमध्वार्चितपाण्डुरङ्गभजने यः पुण्डलीकायते
पाखण्डव्रजशुण्डिखण्डनविधौ यः पुण्डरीकायते ॥
श्रीमन्माध्वसरोवरान्तरविराजत्पुण्डरीकायते
श्री पेजावरपीठमण्डितयतिं विश्वेशतीर्थं नुमः ॥

॥ २ ॥

कामं सन्ति समुल्लसन्ति बहवो हन्तार्थचिन्तापराः
श्रीभिक्षागुरुदक्षिणार्जितधनैर्धन्या हि सन्यासिनः ॥
किं तैः किं न्विह मोदतीर्थसमयाभ्यासार्थिविद्यार्थिना-
मर्थे स्वार्थमहोऽर्पयन् यतिरयं निस्स्वार्थ एकोऽधुना ॥

॥ ३ ॥

प्राचां सुसम्मतसदाचारपद्धतिमनूचानमाचरति य-
श्चाचार्यमध्वगुरुवाचां सुधामधुरिमाचामति प्रतिदिनम् ॥
नीचांश्च दुर्मतपिशाचाहतान् प्रखरवैचारिकोन्नतिपुषा
वाचा निरस्य दृढधीचापलं शुभपथे चालयत्युरुयशाः ॥

॥ ४ ॥

भोजादि दानिवरराजाश्रयादिविरहाजागलायितजनु-
र्भूजातपण्डितसमाजाभिवृद्धिकरणे जागरूकधिषणान्
श्री जानिसम्मतसुपूजा तदेवमिति ये जानतेऽपि च परि-
व्राजाधिपान् प्रणम पेजावरान्वयजपूजार्हसद्गुरुवरान् ॥

॥ ५ ॥

नास्तिक्यं ननु नाशयन् हृदि नृणां भक्तिं समुल्लासयन्
दुर्वादान् परिखण्डयन् कुमतिनां माध्वं मतं मण्डयन् ।
विप्रान् संघटयंश्च छात्रनिलयान् संस्थापयन् नैकसत्
संस्थानिर्वहधूर्वहो विजयतां विश्वेशतीर्थो गुरुः ॥

॥ ६ ॥

विश्वस्य चालक इतीश्वरमर्चतीष्टो
विश्वस्य बोधयति चेश्वरविश्वभेदम् ॥
विश्वस्य सेवनमवैति यदीशसेवां
विश्वेशतीर्थ इति सार्थकनाम धत्ते ॥

॥ ७ ॥

यो यावत्सुकलाकलापकलमांकूरार्द्रकेदारकः
हृद्यावद्यविदूरशास्त्रकविताविद्यानिषद्यायितः ॥
दानध्यानदयादमोपशमदाक्षिण्यादिपण्यक्षितिः
श्री पेजावरपीठपो विजयते पूजार्हयोगीश्वरः ॥

॥ ८ ॥

विद्यापीठपथं न वेत्ति मकरः कन्दर्पवाहोस्य च
स्थानं गारुडगर्भनीडमिति न ज्ञात्वैति कोपोरगः ॥
मत्वा सिंहगुहां न गर्वगजराट्लोभादयोऽन्ये मृगाः
विद्यापीठमयन्ति तत्परिसरं यत्तेजसा तं स्तुवे ॥

॥ ९ ॥

यद्वैराग्यमहो शुकप्रभृतिसद्योग्यैकयोग्यं च यद्
दानौदार्यमनन्यकार्यमसमं गाम्भीर्यमुज्जृम्भते ।
सौजन्यं सहजन्यमेव वरिवर्त्यन्यत्सुधी दुर्लभं
यत्रानुत्तमसद्गुणाश्रय गुरुं विश्वेशतीर्थं श्रये ॥

॥ १० ॥

रागो यस्य बहिर्धृताम्बरचये नैवान्तरङ्गे क्वचित्
काठिण्यं धृतदण्डके स्वरचिते काव्ये तथा वक्रता ॥
तर्के तु व्यभिचारसंगतिकथा लोभो हरेः सेवने
कार्पण्यं बहुपुण्यसंचयविधौ विश्वेशतीर्थं नुमः ॥

॥ ११ ॥

यत्कीर्तिः शिववत् शिवेन धृततद्गङ्गौघवत्तच्छिरोऽ-
लंकारार्धशशाङ्कवच्च वलयीभूतादिशेषाहिवत् ॥
कैलासालयनन्दिवाहनतनूभस्माट्टहासादिवद्
गौरी भाति मनोहरा शुभकरी शुभ्रा तमीडे गुरुम् ॥

॥ १२ ॥

पर्जन्योर्जितगर्जितोग्रनिनदोन्निर्जिष्णुवीचीस्वत-
स्फूर्जद्धूर्जटिसज्जटावटनटच्छ्रीस्वर्धुनीस्पर्धिनी ॥
यद्वाङ्निर्झरिणी तनोति हि भवार्त्या जर्जरान्निर्जरान्
ज्ञानाख्यामृतपानतोऽमृतमितान् वन्दे नरांस्तान्यतीन् ॥

॥ १३ ॥

योऽसौ दण्ड्यपि कोमलार्द्रहृदयश्चण्डो न कस्मिंश्चन
भिक्षुर्यद्यपि लक्षलक्षमनुजान् संभोजयत्यन्वहम् ॥
यो वा रागरहस्यवेद्यपि विरागीशोऽनुरागी नृषु
तं चित्रातिविचित्राचारुचरितं विश्वेशतीर्थं स्तुवे ॥

॥ १४ ॥

सूक्ष्मप्रेक्षविपक्षपण्डितकृताक्षेपप्रतिक्षेपणे
या कौक्षेयकतीक्ष्णतामुपगता वाणी कृपाणी गुरोः ॥
सा लक्ष्मीपति वर्णने परमहो स्वाद्वीं च माध्वीं रुचिं
साध्वीमाप्य च माधुरीं प्रवहति श्रोतृप्रमोदावहा ॥

॥ १५ ॥

वर्ण्याद्याश्रमिसर्ववर्णनृवितीर्णावासकेदारभू-
रौप्यार्घ्याश्मसुवर्णवित्तवसनश्रीदानशौण्डीरताम् ॥
कर्णाकर्णिकयोपकर्ण्य विपुलां कर्णो विवर्णाननो
यस्यासीत्सुगुणार्णवं गुरुवरं तं वर्णितुं कः क्षमः ॥

॥ १६ ॥

यच्छायां समुपाश्रिता भवदवज्वालासमुच्छोषिताः
स्वेच्छाया विषयान्यवाप्य सुफलान्यच्छानि जानन्त्यहो ॥
हृच्छान्ति समुपेत्य कामदगवीं तुच्छां च कल्पद्रुम-
प्युर्वीवर्तिसुपर्वशाखिनममुं विश्वेशतीर्थं श्रये ॥

॥ १७ ॥

यस्यानेककुवादिभेदनविधौ शास्त्रं हि शस्त्रायते
भौतज्ञाननशिष्णु सच्छ्रुतिमतं धर्मं च यस्त्रायते ।
आस्तिक्यं हरिभक्तिमत्र भुवने विस्तार्य निस्तार्यते
लोको येन भवाम्बुधिं विजयते पेजावरस्वामिराट् ॥

॥ १८ ॥

न स्नेहो विषयेषु नेन्द्रियसुखे देहे न गेहे तथा
नो मोहः स्वजनेषु बन्धुषु न चोद्वाहेऽपि वाहे रतिः ॥
नेहाऽराममठाधिकारनिधिसन्नाहे परं श्रीपतेः
यस्याहर्निशपूजने रतिरहो विश्वेशतीर्थं भजे ॥

॥ १९ ॥

पाण्डित्यस्य पुरोऽवधिर्गुणगणानर्घ्योरुसंपन्निधिः
साक्षात्सन्निधिरेव दैविकमहाशक्तेश्च दैवीश्रियः ॥
दिव्यज्ञानमहोदधिर्द्रविणदानोदारताशेवधिः
श्रीमध्वप्रणिधिस्तपःसुपरिधिर्विश्वेशतीर्थो गुरुः ॥

॥ २० ॥

वाणी यद्वदनासनव्यसनितां भेजे विरेजे स्नुषा
श्वश्रूः श्रीः श्रयते च यद् व्रतिपतेस्तत्स्पर्धया वृद्धया ॥
पीठं नेत्रपुटं मठं करतटं वक्त्रं ललाटं स्फुटं
चाङ्गाङ्गान्यखिलानि संगतवती सश्रीकमेनं श्रये ॥

॥ २१ ॥

वाग्वाल्लभ्यमनन्यलभ्यमवनौ यो वाम्युपेतो धिया
हंसोत्तंससुकेतनोऽमलमतिः श्रीसत्यलोकाश्रयः ॥
यः शश्वच्चतुराननोद्‌गतचतुर्वेदः सदानन्दकोऽ
सौ विश्वेश्वरतीर्थं नामक यतिर्भाति स्वयंभूरिव ॥

॥ २२ ॥

दण्डो दण्डनखण्डनादिविविधोद्दण्डक्रियार्थः क्षितौ
यत्पाणिद्वयपुण्डरीकविमलस्पर्शाभिमर्शक्षणे ॥
भास्वत्पण्डितमुण्डिमण्डलकरश्रीमण्डनत्वं गतः
तं विश्वेश्वरमेमि नौमि यमिनां सन्मण्डलाखण्डलम् ॥

॥ २३ ॥

यस्यात्युग्रततपस्तनुं ननु तनुं प्रावृत्य कृत्यम्बरात्
श्रीपीताम्बरतोऽपि गौरवमियं शाटी समाटीकते ॥
पाणिस्पृष्टकमण्डलुः करकसत्कुम्भाद् गतो गौरवं
सोऽयं स्पर्शमणिप्रभावमहितो राराजते सद्‌गुरुः ॥

॥ २४ ॥

तर्कं कर्कशधीपरिष्कृतवचःकोटिक्रमप्रक्रमै-
र्वाग्वक्रान् मतिविक्रमेण विजितांश्चक्रे च यो वादिनः ॥
प्राच्यन्यायनवीनतर्कसमयार्कोदर्कबुद्धिप्रभः
श्रीविश्वेश्वरतीर्थनामकयतिर्न्यायेऽपरो गौतमः ॥

॥ २५ ॥

सा लक्ष्मीललना प्रदातुरनिशं हस्ते निवस्तेऽस्य हि
जिव्हाग्रे च विशारदस्य नरिनर्ति स्फूर्तिदा शारदा ॥
स्वान्ते हन्त च तन्तनीति वसतिं सा शान्तिसीमंतिनी
सन्यासेऽपि दमेऽपि नैकमहिलाश्लिष्टं तमीडे गुरुम् ॥

॥ २६ ॥

वेदान्तेषु यमाहुरेकपुरुषं वेदेष्वहो कोविदं
वेदव्याससभाष्यसूत्ररचनोपन्यासधन्याननम् ॥
अन्यान्यागमनैगमागमतलायामान्तसीमाविदं
तं सर्वङ्कषशेमुषीपरिजुषं वन्दे सुधीज्योतिषम् ॥

॥ २७ ॥

सद्यःस्फूर्तिनिबद्धधमानमधुरप्रासानुबद्धोचिता-
वद्याद्युज्झितहृद्यपद्यरचनावैदग्ध्यविद्योतितः ॥
बाणाद्युत्तमगद्यपद्धतिपुनःप्रद्योतनोद्यद्वचो-
वैशारद्यसुविद्य एष हि गुरुर्नूनं कवीन्द्रो भुवि ॥

॥ २८ ॥

सङ्ख्यावत्पटुशेमुषीनिकषसत्साङ्ख्याद्यसङ्ख्यागम-
प्रेङ्खद्धीप्रतिभापरिष्कृतवचःपुङ्खानुपुङ्खोदयः ॥
काव्यालंकृतिझंकृतोक्तिलहरीदूरीकृतश्रावका-
शंकोद्यन्मुखपङ्कजो विजयते विश्वेशतीर्थो गुरुः ॥

॥ २९ ॥

प्राचां संमतसांप्रदायिकसदाचारान् विचारानपि
यः प्राचारयदत्र मुख्यपवमानाचार्यपीठे स्थितः ॥
नीचानप्युपदेशतश्च कलयन् ही चारुचर्यान् सतः
काचाष्टापदसाम्यधीर्विजयते विश्वेशतीर्थो गुरुः ॥

॥ ३० ॥

राजानोऽद्य न सन्ति भोजसदृशाः श्रीदा उदासाः प्रजाः
स्ववाक्शास्त्रमनीषिणां च महतीं जानन्ति नो शासकाः ॥
कार्यं किं नु विनाश्रयाः श्वसितुमप्यर्हा न ते सा च त-
च्चिन्ता यस्य वदान्यतापरिहृता वन्दे गुरुं दानिनम् ॥

॥ ३१ ॥

कीर्तिर्येन निराकृतापि जगदापूर्तिर्न यं मुञ्चति
लक्ष्मीर्येन मनागनादरमिता त्यक्तापि यं नोज्झति ॥
दत्ता छात्रगणाय न व्ययमिता श्रीशारदा वर्धते
यावत्सद्गुणसद्मसद्गुरुवरं विश्वेशतीर्थं नुमः ॥

॥ ३२ ॥

पाण्डित्यं मणिकारपाणिनिगुरुव्यासोक्तशास्त्रेष्वलं
कालीदासमयूरमाघजयदेवेड्यं कवित्वं तथा ।
कर्णौदार्यपरोपकारकृतिवाक्चातुर्यधुर्यान् गुणान्
दृष्ट्वा कस्य शिरो नमेन्न पदयोरस्यातुलस्वामिनः ॥

॥ ३३ ॥

भूषाम्बरस्रगभिलाषान्निरस्य कटुकाषायमात्रवसनो
योषासुखाद्यनुबुभूषां विहाय मणिपाषणकाचसमधीः ॥
शेषाधिशाय्यज्ञविशेषानुरागमपदोषात्मनाप्य जनता-
तोषावहो बहुलभाषाविदेष बुधपोषातुरो विजयते ॥

॥ ३४ ॥

क्रोधाद्यात्मरिपूज्झितो हि वसुधामेधाविनामग्रणी-
राधारो विदुषां स्वजीवनकृते चाधावतां सर्वशः ॥
साधारण्यपथातिगामिचरितो गाधान्यवैदुष्यभाक्
प्राधान्यं समुपेयिवान् यतिकुले विश्वेशतीर्थो मुदे ॥

॥ ३५ ॥

प्राणायामजपार्चनैर्न भगवान् प्रीतो भवेत्केवलै-
र्लोकाराधनमप्यवश्यमवनौ कर्तव्यमेवाखिलैः ॥
तस्मादेव शिवेन्द्रमारुतिमुखास्सर्वेऽवतीर्यामराः
तत्कार्यं व्यदधुः पुरेत्युपदिशन् कुर्वन् स्वयं भात्ययम् ॥

॥ ३६ ॥

स्वार्थेत्यक्षरयुग्मकार्यमपि यो नो वेद वेदान्तविद्
यो नोहं त्वपि कर्तुमर्हति परद्रोहस्य चेहा कुतः ॥
दीर्घेप्यायुषि नो परापकरणं येनैकदा वा कृतं
सत्यं सात्विकतात्विकोत्तमगुरुं वन्दे यतिं देशिकम् ॥

॥ ३७ ॥

यस्त्वाचार्यपदस्थितोऽपि महितं तुर्याश्रमं मण्डयन्
वानप्रस्थगृहस्थयोगियतिभिश्च ब्रह्मचर्ये स्थितैः ॥
किं कार्यं च कथं नु सर्वजनतोद्धारो विधेयस्त्विति
स्वीयेनैव निदर्शनेन यतिराट् सन्दर्शयत्यञ्जसा ॥

॥ ३८ ॥

पार्थायेश्वरशौरिणा प्रकथिता गीताऽविगीता पुरा
ख्याता यद्यपि नैकपण्डितयतिव्याख्यानभाष्याकुला ॥
मूलार्थो हरिवायुसम्मतियुतो येनाञ्जसाविष्कृतः
सारोद्धारकृतिं विरच्य तनुतेऽसौ कृष्णसेवां यतिः ॥

॥ ३९ ॥

मन्दान्यादरतो दरिद्रजनतासंदानशीले यतौ
मन्दारादिसुरद्रुमा अपि शुचा मन्दाक्षभारानताः ॥
मन्दाकिन्यपि चास्य पावकतया कीर्त्या च मन्दायिता
संदानिप्रवरं पवित्रयमिनं तं देशिकेन्द्रं नुमः ॥

॥ ४० ॥

संसारं सुतरामसारमपि यः कंसारिहंसानिल-
ध्यानोपायविबोधनेन कुरुते मोक्षार्थं संसाधकम् ॥
येनायं तु कलेर्युगः कृतयुगः पुण्यैस्तपोभिः कृतः
धर्मोद्धारधुरन्धरं गुरुवरं तं स्तोतुमीष्टे नु क : ॥

॥ ४१ ॥

जायापुत्रधनादयस्तृणलवप्राया अपि प्राणिनो
मायाजालनिबन्धनेन नितरामायासयन्त्यन्वहम् ॥
हेयैतद्भवबन्धमोचनमहोपायं नृणां दर्शयन्
सर्वोद्धारनिबद्धबुद्धिकरणो विश्वेशतीर्थो मुदे ॥

॥ ४२ ॥

लक्ष्मीशारदयोश्चिरात्परिहरन् घोरं विरोधं तथा
शास्त्रात्यद्भुतपाण्डितीसुविनयप्राचुर्ययोरप्यहो ॥
त्यागाऽश्लाघनयोश्च दानधनयोः सौभाग्यवैराग्ययोः
सामानाधिकरण्यमानयदिदंपूर्वं य इडे यतिम् ॥

॥ ४३ ॥

द्राक्षामाक्षिक आक्षिपन्मधुझरीचेतोहरी माधुरी
यद्वाचोलहरीसुरीतिषु सुधास्वाद्वी जरीजृम्भते ।
क्षीराब्ध्यूर्मिसुजित्वरी प्रतिपदस्फारीभवच्चातुरी
शास्त्राध्यापनवैखरी खलु नरीनर्त्यस्य वक्त्राम्बुजे ॥

॥ ४४ ॥

साहित्ये नवकाव्यनिर्मितिकलापर्याप्तपाण्डित्यभाक्
सच्छास्त्रेषु विशिष्य गीष्पतिसदृग्वैदुष्यविद्योतितः ॥
दुर्वाऽखण्डनतत्वमण्डनपटुर्विश्वेशयोगीन्द्रतः
कोऽन्योऽनन्यकवित्वमान्ययतिमूर्धन्योऽस्ति धन्यः सुधीः ॥

॥ ४५ ॥

स्फुरद्वाङ्माधुर्यो विबुधगणधुर्यो व्रतिवरः
कवीनामध्वर्युर्मुनिविहितचर्यः सविनयः ॥
लसद्धीचातुर्यः श्रुतिमहिततुर्याश्रमिवरः
सुधीर्विश्वेशाख्यो जयति जगदाश्चर्यकृतिमान् ॥

॥ ४६ ॥

येनारीतिधिया निराक्रियत भूनारीसुवर्णादिकं
भोगा रोगधिया धनं च निधनं हीत्यादिमत्योज्झितम् ॥
तुल्ये रौरवगौरवे मणिमृदौ विष्ठाप्रतिष्ठे पुनः
यस्य स्तः स समस्तयोगितिलको विश्वेशतीर्थो महान् ॥

॥ ४८ ॥

पाकारातिगुरोर्हि येन विलसत्पाण्डित्यतो निर्जितो
राकाधीशवपुः सितेन यशसा चाकारि संतर्जितः ॥
नाकारामगकल्पशाख्यपि महादानैश्च लज्जापितः
सौजन्यार्जवसद्गुणोर्जितगुरून् विश्वेशतीर्थाग्रिमः ॥

॥ ४८ ॥

नाहारे रुचिरस्य रस्यरुचिरे मृष्टान्नमिष्टाशने
नो हारे सुमनोहरे जनतया मानार्प्यमाणे मनः ॥
व्याहारे हरिणीदृशां च सरसे नो तद्विहारे स्पृहा
किन्तु क्षेमकरे हरौ भवहरे सक्तं हि चित्तं गुरोः ॥

॥ ४९ ॥

श्रीभण्डारकेरेगुरोरधिगतप्रज्ञानभाण्डारवान्
पर्यायद्वयकालमध्वगुरुराट्सान्निध्यनिर्ध्यूजितः ॥
प्राज्ञश्रीविजयध्वजोरुकरुणासंप्राप्तविश्वगजयः
श्री विश्वेश्वरतीर्थ योगितिलको जेजीयतां भूतले ॥

॥ ५० ॥

पर्यायद्वय-माध्वमण्डल, – बहुप्रादेशशिक्षानिधि-
विद्यापीठ – सुतत्ववाद – विविधछात्रालयायोजकान् ॥
वित्सम्मेलन – तत्वगोष्ठि – शिबिर – श्रीकृष्णसेवाश्रमा-
र्तान्नछत्र – कृति प्रकाश – बदरीछत्रादिकर्तृन् नुमः ॥

॥ ५१ ॥

नाना पञ्चजनांश्च पञ्चमजनान् संचारतः संमिलन्
आपत्संचयवारणाद्य हि नृणां निर्वञ्चनं यत्नकृत् ।
दुःख्यद्व्यष्टि समष्टि कष्टहृतये तुष्ट्यै सचेष्टोऽपरं
पंचाशत्सममञ्चमञ्चतु गुर्विश्वेश ईशाशिषा ॥

– गलगलीत्युपाह्वः पण्डरीनाथाचार्यः, हुब्बळ्ळी

०००००००